# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा–अक्टूबर–२०१९

| | | |
|---|---|---|
| कक्षा –शास्त्रिद्वितीयवर्षम् (SEM-3) | प्रश्नपत्रम् – ७ | गुणाः – ७० |
| विषयः – वास्तुशास्त्रम् | (C.E.- 2.3.3. Old & New ) | समयः –०८.०० तः ११.०० |
| दिनाङ्कः – १६/१०/२०१९ | सन्दर्भग्रन्थः – वास्तुराजवल्लभः | |

**प्रथमान्वितिः**

**प्रश्नः १ अधोलिखितेभ्यः कयोश्चित् द्वयोः व्याख्यां कुरुत।** **१०**

(१) रात्रौ दिक्साधनं कुर्याद् दीपसूत्रध्रुवैक्यतः।
समेभूमिप्रदेशे तु शङ्कुना दिवसेऽथवा॥

(२) अकपाटमनाच्छिन्नसदनं बलि भोजनं।
गृहं न प्रविशेत् धीमान् विपदामाकरं तु तत्॥

(३) मेषादिश्च भवेद् राशिर्नक्षत्रमश्विन्यादिकम्।
वास्तुकर्मसु सर्वेषु गृहवेधं विशोधयेत्॥

**प्रश्नः २ अधोलिखितयोः कस्यचित् एकस्य उपरि निबन्धं लिखतु।** **१०**

(१) वास्तुपुरुषाङ्गे देवविन्यासविचारः लिखतु।

(२) भूमेः ब्राह्मणादिवर्णानां गन्धादिलक्षणानि तेषां शुभाशुभफलञ्च।

**द्वितीयान्वितिः**

**प्रश्नः ३ अधोलिखितेभ्यः कयोश्चित् द्वयोः व्याख्यां कुरुत।** **१०**

(१) प्राकाराश्चेष्टकया द्वादशहस्तोच्छ्रिताहीनाः।
उत्सेधार्धविशाला मूले भित्ति सेसञ्चारा॥

(२) षण्णवत्या युगाऽशीत्या द्विसातव्यङ्गुलैर्युतः।
व्यासस्य षोडशो भागस्तदवधि मंदिरोदयः॥

(३) पारिखादैरिणं श्रेष्ठं पारिधं तु ततो वनम्।
ततो धन्वजलं तस्माद् गिरिदुर्गः ततः स्मृतम्॥

**प्रश्नः ४ अधोलिखितयोः प्रश्नयोः एकस्योपरि उत्तरं लिखतु।** **१०**

(१) दुर्गाणां निर्माणे आकारमानं एवं तेषां फलनिरुपणम्।

(२) राजगृहनिवेशादिलक्षणम्।

## तृतीयान्वितिः

**प्रश्नः ५ निम्नलिखितेषु द्वयानां व्याख्यां कुरुत।** १०

(१) वर्णानां शुभदं च सागरगृहं पञ्चैव ह्रस्वामुखे –
प्रोक्तक्षीरद्रलदाह्वयमिदं कोलाहलसंज्ञानाम्।
षड्दारुद्वयभद्रसप्तालिंदमिदयुक्तशालया –
गान्धर्वं क्षितिभूषणं च कथितं सर्वज्ञादर्प्यका॥

(२) वेदी चतुर्विधा तत्र चतुरस्त्रा च पद्मिनी।
श्रीधरी सर्वतोभद्रा दीक्षासु स्थापनादिषु॥

(३) विवाहे श्रीधरी वेदी विंशत्यस्त्रसमन्विता।
दर्पणोदरसंकाशा निम्नोन्नता विवर्जिता॥

**प्रश्नः ४ अधोलिखितयोः कस्यचित् एकस्य उपरि निबन्धं लिखतु।** १०

(१) द्विशालत्रिशालचतुश्शालगृहलक्षणम्।

(२) दीपस्तम्भलक्षणम्।

## चतुर्थान्वितिः

**प्रश्नः ४ अधोलिखितेषु दशप्रश्नानाममतिलघूत्तराणि देयानि।** १०

(१) कषायस्वादयुक्ताभूमिः कस्य वर्णस्य भवति ?

(२) कस्मिन् दिशि प्लवयुता भूमिः धन – धान्यं वर्धयति ?

(३) नागमुखोपरि भवनस्य निर्माणं भवति वा न ?

(४) 'तालद्वे' अर्थात् कति हस्तः भवति ?

(५) पर्जन्यस्य नैवद्यं किम् ?

(६) आयः कतिविधः भवति ?

(७) नगरस्यमानं केन कर्तव्यं भवति ?

(८) दुर्गेषु कः दुर्गः श्रेष्ठः भवति ?

(९) गिरिमस्तकदुर्गस्य का संज्ञा भवति ?

(१०) भैरवयंत्रस्य मानं किम् ?

(११) वास्तुराजवल्लभग्रन्थस्य रचयिता कः ?

(१२) पूर्वाभिमुखालिन्दस्य का संज्ञा ?

(१३) गरुडवर्गे कानि अक्षराणि आयान्ति ?

(१४) गृहारम्भे चैत्रमासस्य किं फलं भवति ?

(१५) श्रीमुखकूपस्य हस्तप्रमाणं किमस्ति ?

--००--